# अथ गणपत्यथर्वशीर्षोपनिषद्

सभी विद्या में श्रीमन्महागणपति का अभिषेक कर्म एवं स्तुतिपाठ गणपत्यथर्वशीर्षोपनिषद् से सम्पन्न किया जाता है। यथा,

ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गै स्तुष्टुवासन्स्तनूभिर्व्यशेम देवहितं यदायुः ।।1।।
ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्योंऽरिष्टनेमिः स्वस्ति नो वृहस्पतिर्दधातु ।।2।।
ॐ शान्तिः शान्तिः शान्तिः ।

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यम् । ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवनूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात । अव चोत्तरात्तात । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ।।3।।

त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दा द्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि ।।4।।

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ।।5।।

त्वं गुणत्रयातीतः। त्वं वस्थात्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यम् त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रूद्रस्त्वमिन्द्रस्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः सुवरोम् ।।6।।

गणादिं पूर्वमुच्चार्य वर्णादिं तदन्तरं । अनुस्वार : परतरः अर्धेन्दुलसितं तारेण रुद्धं । एतत्तव मनुस्वरूपं । गकारः पूर्वरूपं । अकारो मध्यरूपं । अनुस्वारश्चान्त्यरूपं

बिन्दुरूत्तररूपं । नादः संधानम् संहिता संधिः । सैषा गणेशविद्या । गणक ऋषिः

निचृद्गायत्रीछन्दः श्रीमहागणपतिर्देवता । ॐ गं (गणपतये नमः) ।।7।।

एक दन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् ।।8।।

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।। अभयं वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।। रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्।। भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् ।। आविर्भूतं च सृष्टयादौ प्रकृतेः पुरुषात् परम् ।। एवं ध्यायति यो नित्यं स योगी योगिनाम्वरः ।। 9।।

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमो नमः ।।10।।

एतदथर्वशिरो योऽधीते स ब्रह्मभूयाय कल्पते । स सर्वतः सुखमेधते । स सर्वविघ्नैर्न बाध्यते । स सर्वमहापापात्प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानोऽपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षम् शिष्याय न देयम् । यदि मोहाद् दास्यति, सपापीयान भवति ।

सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत ।।11।

अनेन गणपतिमाभिषिञ्चति स वाग्मी भवति । चतुर्थ्यामनश्नञ्जपति स विद्यावान् भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यात् । न बिभेति कदाचनेति । यो दूर्वाङ्कुरैर्यजति य वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान् भवति । स मेधावान् भवति । यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्यसमिभ्दिर्यजति स सर्वं लभते स सर्वं लभते। अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासंनिधौ वा जपत्वा सिद्धमन्त्रो भवति । महाविघ्नात्प्रमुच्यते । महादोषात् प्रमुच्यते । महापापात् प्रमुच्यते । स सर्वविद्भवति । स सर्वविद्भवति । य एवं वेद इत्युपनिषद् ।।13।। ॐ सहनाववतु सहनौ भुनक्तु । सह वीर्यं करवाव है। तेजस्विनावधीतमस्तु मा विद्विषाव है ।। ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गै स्तुष्टुवासंस्तनूभिर्व्यशेम देवहितं यदायुः ।।1।।। ॐ स्वस्ति न इन्द्रो वृद्धाश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्ताक्ष्योऽरिष्टनेमिः स्वस्ति नो वृहस्पतिर्दधातु ।। ॐ शान्तिः शान्तिः शान्तिः ।